International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2025; 2(4): 09-12
© 2025 IJMH
www.themultijournal.com
Received: 28-06-2025
Accepted: 08-07-2025
Publish : 09-07-2025

डॉ. लालसिंहपठानिया
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

Correspondence:
डॉ. लालसिंहपठानिया
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

# काव्यशास्त्रेऽन्यशास्त्राणां प्रभावः

**डॉ. लालसिंहपठानिया**

कवेः कर्म काव्यमुच्यते तत्र काव्यमधिकृत्यं शास्त्रं काव्यशास्त्रमित्यपि वक्तुं शक्यते नास्त्यत्र काऽपि विप्रतिपत्तिः । प्राचीनकालेऽस्मिन् भारतवर्षे यैराचार्यैर्मनीषिभिः काव्यशास्त्रसिद्धान्तानां विकासो निष्पादितः, ते न केवलं काव्यशास्त्रस्य ज्ञातारः पण्डिता वा बभूवुः अपि त्वन्येषामनेकेषां शास्त्राणां व्याकरणदर्शनादीनामपि तत्त्वानाम् अभिज्ञा अवर्तन्त।

अतः स्वाभाविकमेतद्यत्काव्यशास्त्रविवेचना अन्यैरपि शास्त्रैः प्रभाविता भवेत्। अयमेव हेतुर्यत् संस्कृतकाव्यशास्त्रविकासेऽन्येषां शास्त्राणां प्रभावः स्वभावतो ध्रुवं परिलक्षितो भवति। काव्यशास्त्रं प्राध्यान्येन यैः शास्त्रैः प्रभावितं सञ्जातं तानि सन्ति व्याकरण-न्याय-साङ्ख्य-पूर्वोत्तरमीमांसाः। प्रभावस्याऽस्य संक्षिप्तदिग्दर्शनं काव्यशास्त्रजिज्ञासुभ्य उपयोगि वर्तते।

**व्याकरणशास्त्रस्य प्रभावः –**

काव्यशास्त्रस्य विकासे व्याकरणशास्त्रस्य प्रभावोऽनेकविधो लक्ष्यते। व्याकरणशास्त्रस्याऽयं प्रभावो मुख्यरूपेण ध्वनिविवेचने, अभिधेयार्थप्रतिपादने, उपमायाश्च भेदोपभेदविवेचने संलक्ष्यते। ध्वनि-सिद्धान्तप्रतिपादनं प्रतिष्ठापनञ्च प्रथमं तावदानन्दवर्धनेन विहितम्।

आनन्दवर्धनो जगाद - प्रमुखाः विद्वांसो हि वैयाकरणाः भवन्ति । व्याकरणमेव सर्वासां विद्यानां मूलम्। वैयाकरणाः श्रूयमाणेषु वर्णेषु ध्वनिं व्यवहरन्ति । काव्यशास्त्रिणोऽपि तेषामेव मतमनुसृत्य वाच्यार्थवाचकशब्दे व्यङ्ग्यार्थे, व्यञ्जकशब्दे व्यञ्जनाव्यापारे च ध्वनिपदं व्यवहरन्ति। तथाहि- प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिरिति व्यवहरन्ति ।

तथैवाऽन्यैस्तन्मतानुसारिभिः काव्यतत्त्वार्थदर्शिभि-र्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः ।[1] काव्यप्रकाशकृन्मम्मटोऽप्यानन्दवर्धनस्य कथनमेतत् समर्थयामास । तेन प्रोक्तम्- ध्वनिपदव्यवहारे काव्यशास्त्रिणो वैयाकरणानन्वसरन्। वैयाकरणाः प्रधानभूतस्फोटरूप-व्यङ्ग्यव्यञ्जकशब्दं ध्वनिं जगदुः।ताननुसृत्य काव्यशास्त्रिणोऽपि वाच्यार्थातिशायिनो व्ययार्थस्याऽभिव्यञ्जकं शब्दार्थयुगलं ध्वनिं प्रोचुः। यथा-वृधवयाकरणः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः । ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावित-वाच्यव्यङ्ग्यव्यजन समास्य शब्दार्थयुगलस्य।[2] एवं काव्यशास्त्रे ध्वनिसिद्धान्तविकासक्रमे व्याकरणशास्त्रप्रभावः सुस्पष्ट लक्ष्यते। ध्वनिसिद्धान्तस्य विकासो वैयाकरणानां स्फोटसिद्धान्ताश्रयेण प्रादुवर्भूव । महाभाष्यकारः शब्दमेवं ध्वनिं प्रोवाच। तस्य विवेचनम् इत्थं वर्तते - कस्तर्हि शब्दः? येनोच्चारितेन सास्नालाङ्गुल-ककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतिपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा - शब्दं कुरु, शब्दं मा कार्षीः, शब्दकार्ययं को माणवक? इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः ।[3]

**वैयाकरणानां मन्तव्यमिदम्-** गौरिति पदस्योच्चारणे त्रयो वर्णाः श्रूयन्ते- ग+औ+(विसर्गः) । परं न तेषामेकस्मिन्नेव काले समुपस्थितिः। ग वर्णस्योच्चारणे औ-विसर्ग-वर्णयोर्ध्वनिर्नास्ति । तदनन्तरं औ इति वर्णस्योच्चारणे ग्-विसर्ग-वर्णयोर्ध्वनिर्नास्ति । अथ च विसर्गवर्णस्योच्चारणे ग-औ-वर्णयोर्ध्वनिरनुपस्थितो वर्तते। वर्णानां तदुच्चारणानन्तरमेव विनाशप्रसङ्गात् ।

अतः प्रश्नोऽयं समुल्लसति यद् गौः इति समग्रपदस्याऽर्थबोधः कथं जायेत? विसर्ग-वर्णोऽर्थबोधनेऽक्षमः सकलपदार्थबोधनाक्षमत्वात् । गौः इति पदमपि नाऽर्थावबोधने क्षमः समग्रवर्णानामुपस्थित्यभावात् ।

प्रश्नस्याऽस्य समाधानं वैयाकरणैः स्फोटसिद्धान्तं प्रतिपाद्य कृतम्। तेषां कथनमस्ति, सम्पूर्णपदोपस्थितिप्रसन्ने पूर्वपूर्ववर्णोच्चारणान्तरम् अन्तिमवर्णोच्चारणे पूर्वपूर्ववर्णविनाशेऽपि तेषां स्मृतिरवशिष्टा भवति।

इयं पूर्ववर्णस्मृतिरन्तिमवर्णध्वनिना संयुज्याऽर्थं बोधयति। अयमेव स्फोटो वर्तते, ध्वन्यात्मकश्चाऽसौ। तथाहि – पूर्वपूर्ववर्णानुभवजनित-संस्कारसहकृतान्य -वर्णानुभवः स्फोटो व्यज्यते, स च ध्वन्यात्मकः। वैयाकरणाः ध्वनिपदव्यवहारः केवलं शब्द एव चक्रुः।

काव्यशास्त्रविद्भिर्ध्वनिपदग्रहणे वैयाकरणाम् अनुसरणं तु कृतं, परन्तु तस्याऽभिप्राये किञ्चित् परिवर्तमनपि विहितम्। ते तु वाच्यार्थवाचक-शब्दव्यङ्ग्यार्थव्यञ्जनाव्यापारेषु सर्वेषु पञ्चसु तत्त्वेषु ध्वनिपदप्रयोगं विनिवेशयामासुः। अभिधेयार्थस्वरूपनिर्धारणेऽपि काव्यशास्त्रिणो वैयाकरणानन्वसरन। मम्मटेन काव्यप्रकाशे प्रतिपादितम्- सङ्केतितोऽर्थश्चतुर्विधो भवति जाति-गुण-क्रिया-संज्ञारूपः। अथ च केवलं जातिरूपो वा। यथा-

सङ्केतितश्चतुर्भदो जात्यादिर्जातिरेव वा।[4]

सङ्केतितस्य चतुर्विधत्वप्रतिपादनाय मम्मटो महाभाष्यारं प्रमाण-रूपेण श्रास्तीत्। तेन प्रोक्तम्- गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तितरिति महाभाष्यकारः। तत्रैव वृत्तौ अनेकार्थकशब्दानां वाचकतायाः नियमनाय मम्मटो भर्तृहरेः वाक्यपदीयं ग्रन्थं प्रमाणं मेने, तस्य च ग्रन्थस्य प्रसिद्धौ संयोगविप्रयोग इत्यादी श्लोकावुद्धृतवान्।

उपमायाः भेदोपभेदविवेचनेऽपि काव्यशास्त्रिणो वैयाकरणानन्वसन्। साहित्यदर्पणे पूर्णोपमायाः द्वो भेदौ प्रौक्तौ श्रौती आर्थी च। तयोर्लक्षणं विद्यते-

**श्रौती तथैव वा शब्दा इवार्थो वा वतिर्यदि।**
**आर्थी तुल्यसमानाद्या तुल्यार्थो यत्र वा वतिः ॥**[5]

श्रौती उपमा तत्र भवति, यत्रोपमायां यथा-इव-वा इत्यादीनां सादृश्यार्थकानां पदानां प्रयोगो विधीयते, यत्र वा 'तत्र तस्येव'[6] इति सूत्रेण इवार्थे वतिप्रत्ययो विधीयते। अथ च आर्थी उपमा तत्र कथ्यते यत्र तुल्यसमानादीनामुपमावाचकानां शब्दानां प्रयोगो विधीयते। अथ च यत्र तुल्यार्थे 'तेन तुल्यं क्रिया चेद्वतिः'[7]इति सूत्रेण वतिप्रत्ययो विधीयते। पूर्णोपमाभेदान् प्रतिपादयन् मम्मटो व्याकरणमाशिश्रिये-

**श्रौत्यार्थी च भवेद वाक्को समासे तद्धिते तथा ॥**[8]

अग्रिमा (प्रथमा) पूर्णोपमा द्विविधा वर्तते श्रौती आर्थी च। पुनस्ते द्वे अपि त्रिविधे भवतः - वाक्यगता, समासगता तद्धितगता च। पूर्णोपमायाः श्रौत्यार्थीभेदयोरुपभेदाः केषुचिदंशेषु व्याकरणशास्त्रेण नियमिताः भवन्ति, परं लुप्तोपमायाः पञ्चभेदा सम्पूर्णतो व्याकरणसूत्रैर्नियम्यन्ते।

साहित्यदर्पण-कारेणैते भेदा एवं परिगणिताः-

**आधारकर्मविहिते द्विविधे च क्यचि क्यङिः।**
**कर्मकत्रैर्णमुलि च स्यादेवं पञ्चधा पुनः ॥**[9]

एवमुपमाभेदनिर्धारणे व्याकरणशास्त्रस्य प्रभावो वाहुल्येन संलक्ष्यते। न केवलं मम्मट एव प्रभावमेतं सुविशदं व्याकरोदथ च मम्मटात् पूर्ववर्तिष्वपि काव्यशास्त्रग्रन्थेषु प्रभाव एषो दरीदृश्यते। भामहेन वतिनाऽपि क्रियासाम्यमिति लिखित्वा प्रभाव एषः प्रदर्शितः। उद्भटस्ततोऽधिकं विशदरूपेण प्रभावमेतं प्रदर्शितवान्।

वामनेन काव्यालङ्कारसूत्रस्य पञ्चमेऽधिकरणे भामहेन काव्यालङ्कारस्य षष्ठाध्याये 30-31 श्लोकयोः काव्यभाषायां व्याकरण-शुद्धताऽनिवार्यरूपेण प्रतिपादिता। काव्येषु व्याकरणदोषाश्युत-संस्कृतिदोषाः प्रोक्तास्ते च नित्यदोषाः सत्कविभिः सदा परिहर्तव्याः।

**न्यायशास्त्रस्य प्रभावः**

न्यायशास्त्रमपि काव्यशास्त्रं प्रभावयामास। तर्कशास्त्रे शब्दशक्ति-विवेचनम् (अभिधाविवेचनम्) अस्ति। अभिधामातृकावृत्ति-शब्द-व्यापारविचार-त्रिवेणिका- वृत्तिकादि-ग्रन्थेषु शब्दशक्तिमाश्रित्य विषयविवेचनं ग्रन्थकारैर्विहितम्।

व्यक्तिविवेकग्रन्थकृन्महिमभट्टो व्यञ्जनावादिनां व्ययार्थप्रतीति-मनुमानेनैव प्रतिपादयामास। ध्वनेरन्तर्भावमसावनुमान एव कर्तुं प्राय-तिष्ट ।अनेकेषामलङ्काराणां विकासक्रमेऽनुमानस्य योगो दरी-दृश्यते।अनुमानालङ्कारोऽपि काव्यशास्त्रविधायिभिः परिभाषितः। हेतुकाव्यलिङ्गादीनाम् अलङ्काराणाम् उद्भावनेऽनुमानस्याश्रयः काव्यालङ्कारलक्ष्मविधायिभिर्मनीषिभिः स्वीकृतः। अप्पयदीक्षितस्तु प्रत्यक्षादिप्रमाणान्यप्यलङ्काररूपेण स्वीकृतवान्।रसनिष्पत्तिव्याख्या-यामप्यनुमानस्याऽऽश्रयः कैश्चिद् रससूत्रव्याख्याकारैर्गृहीतः। "विभा-वानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति 'रिति भरतसूत्रस्य व्याख्या शङ्ककेन अनुमानमेवाश्रित्य प्रस्तुता।

**साङ्ख्यशास्त्रस्य प्रभावः-** काव्यशास्त्रे साङ्ख्यशास्त्रस्य प्रभावो बाहुल्येनाऽविद्यमानोऽपि केषुचिदंशेषु कत्रचित संलक्ष्यत एव। भरतसूत्रस्य भट्टनायककृतव्याख्यायां साङ्ख्यप्रभावः संलक्ष्यते।

रससूत्रस्य व्याख्यायां भट्टनायकेन सत्त्वरजस्तमसां त्रयाणां गुणानां भोजकत्व-सिद्धान्तस्य च प्रतिपादनं विहितम्। साङ्ख्यदर्शने प्रकृतिस्त्रिगुणात्मिका सत्त्वरज-स्तमोमयी प्रोक्ता, तस्याश्च भोक्ता पुरुषो वर्तते। भट्टनायकेन प्रतिपादितम्-भावकत्वव्यापारेण स्थायिभावे भाविते सति तस्य रजोगुणस्य तमोगुणस्य चाऽभिभवो भवति। सत्त्वगुणस्य चोद्रेकः सञ्जायते। तदनन्तरं सामाजिको भोजकत्व-व्यापारेण तस्य भोगं करोति (आस्वादयति)।

**मीमांसाशास्त्रस्य प्रभावः -** काव्यशास्त्रविकासे मीमांसादर्शनस्यापि (पूर्वमीमांसादर्शनस्य) प्रभावः संलक्ष्यते, विशेषतस्तु शब्दशक्तीनां व्याख्याने ध्वनिवादिभिराचार्यैरभिधा-लक्षणाव्यञ्जनास्त्रिविधाः शब्द-शक्तयो वाच्यलक्ष्यव्यङ्ग्याश्च त्रिविधा अर्थाः स्वीकृताः। परन्तु मीमांसकाः व्यञ्जनावृत्तिं नाऽङ्गीकुर्वन्ति।

अथ च मीमांसकानामेकः सम्प्रदायो (अभिहितान्वयवादी) वाक्यार्थ-बोधनाय तात्पर्या वृत्तिं प्रतिपादयन् वाक्यार्थ तात्पर्यार्थं ब्रूते।

मीमांसका एते वदन्ति-वाक्ये पदमभिधया पदार्थमेव बोधयति, न तु वाक्यार्थम्। वाक्ये वाक्यार्थः पदार्थानामन्वये सत्यवबुध्यते। पदानामयमन्वयस्तात्पर्यवृत्या सम्पद्यते। कुमारिलभट्टानुयायिनां मीमांसकानामेतन्मतम् ।

परमन्यो मीमांसकसम्प्रदायो (प्राभाकराः- अन्विताभिधानवादिनः) न तात्पर्यवृत्तिमङ्गीकरोति। पदानाम् अन्वितोऽर्थोऽभिधेयैव सम्पद्यत इति तेषां मतम्। तात्पर्यावृत्तिवादिनो मीमांसका अभिहितान्वय-वादिनः सन्ति। परं तात्पर्यवृत्तिं ये नाङ्गीकुर्वन्ति तेऽन्विता-भिधानवादिनः कथ्यन्ते।

मम्मटस्तु काव्यप्रकाशे द्वयोरेव मतयोरुल्लेखं कृत्वाऽकथयत्- केचन आचार्यास्तात्पर्या वृत्तिं प्रतिपादयन्ति। तथाहि- तात्पर्यार्थोऽपि केषुचित्।[10] विश्वनाथेनाऽपि लिखितम् - "तात्पर्यार्थबोधनाया-ऽभिहितान्वयवादिनस्तात्पर्या वृत्तिं मन्वते।" तथाहि -

**तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।**
**तात्पर्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे ॥**[11]

सङ्केतग्रहणप्रसङ्गेऽपि ध्वनिवादिन आचार्याः मीमांसादर्शनं पस्पर्शुः। सङ्केतग्रहणं कस्मिन् भवतीति विषये मम्मटेन द्वौ पक्षौ प्रस्तुतौ -जात्यादिवादिनो जातिवादिनश्च। वैयाकरणाः सङ्केतग्रहणं जात्यादिषु (जातौ, गुणे, क्रियायां सञ्ज्ञायाञ्च) मन्वते। परं मीमांसकाः सङ्केतग्रहणं जातावेव प्रतिपादयन्ति। गुणः क्रिया संज्ञा च जातिरेवेति मीमांसकमतं मम्मटेन निर्दिष्टम्- "गुणक्रियायदृच्छानां वस्तुत एकरूपाणामपि भेद एव संलक्ष्यते।

यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात्। हिमपयः शङ्खाद्यायेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लः इत्यभिन्नाभिधान-प्रत्ययोत्पत्तिस्तच्छुक्लत्वादिसामान्यम्।

गुडतण्डुल-पाकादिष्वेवमेव पाकत्वादि। बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमिन्यन्ये ।[12]

लक्षणानिरूपणेऽपि काव्यशास्त्रे संलक्ष्यते । गौर्वाहीको गौरयञ्चेति मीमांसकानां प्रभावः गौणीसारोपालक्षणायाः गौणीसाध्यवसाना-लक्षणाया -श्चोदाहरणयोर्गोगताः गुणाः वाहीके कथं लक्ष्यन्त इति विवेचने मम्मटः कुमारिलभट्टस्य तन्त्रवार्तिकग्रन्थस्य श्लोकमेकमु-द्धृतवान्-

**अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।**
**लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ॥**

मीमांसकाः व्यञ्जनावृत्तिं न स्वीकुर्वन्ति । व्यञ्जनावादिनां व्यङ्ग्यार्थं तेऽभिधाप्रतिपाद्यं साधयन्ति। ध्वनिवादिभिराचार्यैः मीमांसकानां मतमिदं सबलं सप्रमाणञ्च खण्डितम्।

काव्यप्रकाशस्य पञ्चमोल्लासे मीमांसकानां युक्तीनां वादानाञ्च-अभिहितान्वयवादस्य, अन्विताभिधानवादस्य, नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते, इषोरिव दीर्घदीर्घतरो व्यापारः, यत्परः शब्दः स शब्दार्थः, लोहितोष्णीषा ऋत्विजः प्रचरन्ति, श्रुतेरनन्तरं यावानार्थो लभ्यते तावति शब्दस्याऽभिधैय व्यापार इति सर्वेषां मतानां खण्डनं कृत्वा मम्मटाचार्यः काव्ये व्यञ्जनावृत्तिं व्यङ्ग्यार्थञ्चाऽनिवार्यरूपेण प्रतिपादयामास ।

लक्षणावृत्त्या प्रतिपादितस्य लक्ष्यार्थस्य प्रयोजनस्य च भिन्नत्वमस्तीति तथ्यं ध्वनिवादिभिराचार्यैः मीमांसान्यायदर्शनयोः प्रमाणैरेव साधितम्। मम्मटाचार्येण प्रोक्तम्- मीमांसका यथा ज्ञान-विषयस्य ज्ञानफलस्य च भिन्नत्वं प्रतिपादयन्ति, तथैव लक्षणाजन्यस्य ज्ञानस्य (लक्ष्यार्थस्य) फलस्य (प्रयोजनस्य) च भिन्नत्वमस्त्येव। यथा-

**प्रयोजनेन सहितं लक्षणीयं न युज्यते।**
**ज्ञानस्य विषयो ह्यन्यः फलमन्यमुदाहृतम् ॥**[13]

अथ चालङ्काराणां निरूपणेऽपि काव्यशास्त्रे मीमांसकानां प्रभावः संलक्ष्यते। मीमांसकानामर्थापत्ति-प्रमाणमधिकृत्य काव्यशास्त्रिभिरर्था-पत्त्यलङ्कारोऽङ्गीकृतः । एवमेव परिसङ्ख्यालङ्कारस्य परिसङ्ख्या-पदमपि मीमांसकानामेकः प्रसिद्धः पारिभाषिकशब्दो वर्तते ।[14]

**वेदान्तस्य (उपनिषदां) प्रभावः –**

काव्यशास्त्रे वेदान्तस्योपनिषदां वा प्रभावः क्वचित् संलक्ष्यते। प्रभाव एष रसस्वरूपविवेचने प्राधान्येन वर्तते। ध्वनिवादिन आचार्याः सामान्यतो रसात्मानञ्चैकरूपं जगदुः। तैत्तिरीयोपनिषदो ब्रह्मानन्द-वल्लयामात्मा रसः प्रोक्तो, येनासावानन्दरूपो भवति। रसो वै सः। रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति। (तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ली) रसस्वरूपविवेचने पण्डितराजो जगन्नाथ उपनिषदामेतदवतरण-मुद्धृतवान् अस्त्यत्राऽपि रसौ वै सः।

"रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति" इत्यादि श्रुतिः ।[15] काव्यप्रकाशे मम्मटेन रसानुभूतिर्ब्रह्मानन्दसहोदरी प्रोक्ता। अनुभूत्यां तस्यां सत्यां सर्वाण्येवाऽन्यानि वेद्यानि तिरोभवन्ति- अन्यत् सर्वमिव तिरोदधद् ब्रह्मास्वादमिवाऽनुभावयन् अलौकिक चमत्कारी शृङ्गारादिको रसः।[16]

मम्मटाचार्यस्येदं वचः बृहदारण्यकोपनिषदो निम्नवचनेन प्रभावितं वर्तते - तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न वाह्यं किञ्चन वेद नान्तरमेवाऽयं पुरुषः प्राज्ञेनान्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। तद्वा तस्मै तदाप्तकाममकामं रूपं शोकान्तरम्। अत्र पिताऽपिता भवति... तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति।[17]

एतेभ्यो नास्ति विनिर्मुक्तं गौडीयकाव्यशास्त्रमपि। परन्तु तत्र श्रीकृष्णविषया उत्तमा भक्तिः रत्यपरपर्यया स्थाविरूपा सती विभावादिभिः संवलिता भक्तिरसरूपतां समवगाहत इति विशेषः। उच्यते श्रीरूपगोस्वामिपादैः-

**विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।**
**स्वाद्यत्वं हृदि भक्तानामनीता श्रवणादिभिः॥**

एषा कृष्णरतिः स्थायी भावो भक्तिरसो भवेत्। भक्तिरसस्य मूलं स्रोतो भक्तिशास्त्र विद्यते। यद्यपि भक्तिरसस्य बीजं वैदिकवाङ्मयेऽपि समुपलभ्यते, किन्तु तस्य स्पष्टस्वरूपं भक्तिशास्त्रेषु एव परिलक्ष्यते। भगवत्साधनाया मुख्यं प्रयोजनं भगवन्तं प्रति स्नेह एवं वर्तते। भक्तितत्त्वज्ञैः शाण्डिल्यनारदादिभिर्भक्तिः 'परमप्रेमस्वरूपा' तथा 'परानुरक्तिरीश्वरे' इत्यादिरूपेण प्रतिपादिता।

**उपसंहारः -** अत एव विशुद्धः प्रेमरसानन्द एव जीवस्य प्रकृतिस्वरूपं स्वभावो वास्ति । विषयानवच्छिन्नचैतन्यमेव द्रुतान्तःकरणवृत्तौ समारूढं सत् स्थायिभावस्यं तदन्तरं रसत्वञ्चोपैति । अत एव तैः 'प्रेमा पुमर्थो महान' इत्यादिना प्रेमा एव परमपुरुषार्थत्वेन स्वीकृतः। भगवद्रतिरेव क्रमशः प्रेमप्रणयमानस्नेहरागानुरागभाव- महाभावादि-रूपेण वृद्धिं गता यदा परमोत्कर्षत्वमेति तदा सैव रसराज-भक्तिरसरूपेण परिणता भवति, भक्तिरसोऽयं समस्तसौन्दर्याणां सौन्दर्यम्, समग्ररसानां च मधुरनिर्यासः, यस्यानन्दातिरेकेण जीवात्मा भक्तो वा आत्मसम्पृक्त-पर-सम्पृक्तादिभावैः सर्वथाऽसंस्पृष्टः सन् चिदानन्दमयत्वं भजते। सूर्यकिरणवद् अथवा अग्निस्फुलि-ङ्गवज्जीवात्मा नित्यरसस्वरूपस्य प्रेमरूपस्यानन्दस्वरूपस्य परमात्मनः अंशोऽस्ति ।

**सन्दर्भ ग्रन्थ -**


1. ध्वन्यालोकः
2. काव्यप्रकाशः
3. महाभाष्यम्
4. काव्यप्रकाशः
5. साहित्यदर्पणम्
6. अष्टाध्यायी
7. मीमांसासूत्रम्
8. रसगङ्गाधरः
9. बृहदारण्यकोपनिषत्


**सन्दर्भ**

1. 'ध्वन्यालोकः, 1.13
2. काव्यप्रकाशः, 1.4
3. महाभाष्यम्, प्रथमाह्निकम्, 1.3
4. काव्यप्रकाशः, 2.8
5. साहित्यदर्पणम्, 10.16
6. अष्टाध्यायी, 5.1.116
7. अष्टाध्यायी, 5.1.115
8. काव्यप्रकाशः, 20.87
9. साहित्यदर्पणम्, 10.19
10. काव्यप्रकाशः, 2.1
11. साहित्यदर्पणम्, 2.20
12. काव्यप्रकाशः, 2.8
13. काव्यप्रकाशः, 2.27
14. मीमांसासूत्रम्, 1.2.34, 3.7.33
15. रसगङ्गाधरः, 1.4-7
16. काव्यप्रकाशः, 4.27-36
17. बृहदारण्यकोपनिषत्, 4.3.21